अक्टूबर, नवम्बर, दिसम्बर २०१७ ईसवीयाब्दः ओ३म् R.N.I. No. UPBIL/१९९८/१४८५

ज्वालापुरीय - गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

❁ 'भारते भातु भारती' ❁

## गुरुकुल-महाविद्यालय-ज्वालापुरस्य श्रीदर्शनानन्द-द्वारम्




द्वारमिदं स्वर्णजयन्ती-महोत्सव-स्मृतौ 'श्रीभगवानदेव-आर्य एण्ड कम्पनी बम्बई' इत्यनेन ८०००/-व्ययधनराशिमाध्यमेन सं.२०१६वि. इत्यस्य वैशाखमासे निर्मितम्

दूरभाष ९४१२०७३५७८ (मु.का.), ९४१२०७३५८१ (शि.वि.) (ज्वालापुरम्) तारगृहम्- महाविद्यालयः ज्वालापुरम्

# भारतोदयः

संस्कृत-मासिकपत्रम्

| वर्षम् | अङ्काः |
|---|---|
| १०८ | ४,५,६ |

सम्पादकः
डॉ. हरिगोपालशास्त्री
व्याकरणाचार्यः
एम.ए., पी-एच. डी.
राष्ट्रपति-पुरस्कृतः

सह-सम्पादकः
डॉ. सुशीलकुमार त्यागी
साहित्याचार्यः
एम.ए., पी-एच. डी.

प्रबन्ध-सम्पादकः
डॉ. अजयकौशिकः
साहित्याचार्यः
एम.ए., पी-एच. डी.

प्रकाशकः
गुरुकुलमहाविद्यालयः ज्वालापुरम्
हरिद्वारम्-२०९४०४
(उत्तराखण्ड-प्रदेशः)

शुल्क-विवरणम्

| | |
|---|---|
| प्रत्यङ्कम्- | १०/- |
| वार्षिकम्- | १००/- |
| आजीवनम्- | १०००/- |


## विषयानुक्रमणिका


| | | | |
|---|---|---|---|
| 1. | श्रुति-सुधा | महर्षिदयानन्दसरस्वती | 3 |
| 2. | पुराणेषूत्तराखण्डस्य तीर्थगरिमा | डॉ. व्रजेन्द्रकुमारसिंहदेवः | 4 |
| 3. | सुरवागमृता | डॉ. मिश्रोऽभिराजराजेन्द्रः | 6 |
| 4. | उपनिषद्वाङ्मये अर्थप्राप्तिविद्या | प्रो. मनुदेवबन्धुः | 7 |
| 5. | ईश्वरः सर्वव्यापकः | डॉ. रामकिशोरमिश्रः | 11 |
| 6. | महाभारते विदुरनीतिमहत्त्वम् | प्रो. सत्यदेवनिगमालङ्कारः | 12 |
| 7. | धरां मातृभूमिं भजामो मुदा | श्री सर्वेशकुमारतिवारी | 14 |
| 8. | उपनिषदां वैशिष्ट्यम् | कु. पूजारानी | 15 |
| 9. | गङ्गाया अवतरणम् | डॉ. रामकिशोरमिश्रः | 18 |
| 10. | महाविद्यालय-समाचारः | | 19 |
| 11. | दृष्टस्त्वया प्रभावो मे | डॉ. प्रशस्यमित्रशास्त्री | 20 |



**राष्ट्रिय-संस्कृत-संस्थानस्य अनुदान-साहाय्येन प्रकाशितम्**

**भारतोदयः (संस्कृत-मासिकम्)**

(RNI Regd. No. UPBIL/1998/1485)

| | |
|---|---|
| १. प्रकाशनस्थानम् | ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डम्) |
| २. प्रकाशनकालावधिः | मासिकम् |
| ३. सङ्केतेन सह मुद्रकस्य प्रकाशकस्य, सम्पादकस्य नाम, नागरिकता च | डा. हरिगोपालशास्त्री, भारतीयः गुरुकुलमहाविद्यालयः ज्वालापुरम् पत्रालयः- गुरुकुल काङ्गड़ी, हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) |
| ४. पत्राधिकारिणां नाम्ना सह सङ्केतः पत्रालयः - | ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभा, ज्वालापुरम्, गुरुकुल काङ्गड़ी हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) |

डॉ. हरिगोपालशास्त्री इति नामाहं समुद्घोषयामि यदुपरि लिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

-डॉ. हरिगोपालशास्त्री

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

भविक-भरित-भारतोदयोऽयं भव-विभवोद्भव-भावनाभिलाषी।
भगवति भुवि भक्ति-भाव-भाजां भव-भय-भाव-भरं भ्रियान्नभूमन्॥

x x x

निशम्यतां लेख-ललाम-सञ्चय-प्रकाशने येन कृतोऽतिनिश्चयः।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः'॥

वर्षम्- १०८ | कार्त्तिकः, मार्गशीर्षः, पौषः २०७४ विक्रमाब्दः ✷ अक्तूबर, नवम्बर, दिसम्बर २०१७ ईसवीयाब्दः | अङ्काः- ४,५,६

## ✷ श्रुति-सुधा ✷

ओ३म् यदिन्न्विन्द्र पृथिवी दशभुजिरहानि विश्वा ततनन्त कृष्टयः ।
अत्राह ते मघवन् विश्रुतं सहो द्यामनु शवसा बर्हणा भुवत् ॥

ऋग्वेदः १.१०.५२.११

पदार्थः-

(यत्) वक्ष्यमाणम् (इत्) एव (नु) शीघ्रम् (इन्द्र) सभासेनाध्यक्ष (पृथिवी) भूमिः (दशभुजिः) या दशभिरिन्द्रियैर्भुज्यते, सा (अहानि) दिनानि (विश्वा) सर्वाणि (ततनन्त) विस्तीर्णानि भवन्ति (कृष्टयः) कृषन्ति विलिखन्ति स्वानि कर्माणि ये, ते मनुष्याः। (अत्र) अस्मिन् व्यवहारे (अह) विनिग्रहार्थे (ते) तव (मघवन्) उत्कृष्टधनविद्यैश्वर्ययुक्त (विश्रुतम्) यद्विविधं श्रूयते तद्यशः (सहः) बलम् (द्याम्) राजपालनविनयप्रकाशम् (अनु) आनुकूल्ये (शवसा) बलेन (बर्हणा) सर्वसुखप्रापिकया क्रियया। अनेन प्राप्त्यर्थो गृह्यते। (भुवत्) भवेत्।

भावार्थः-

राजपुरुषैः स्वराज्ये सुखानां वृद्धिर्विविधगुणप्राप्तिश्च यथा स्यात् तथैवानुष्ठेयमिति॥ ११॥

-महर्षिदयानन्दसरस्वती

[ऋग्वेदभाष्यम्, तृतीयो भागः, ३३पृष्ठे]

# ✳ पुराणेषूत्तराखण्डस्य तीर्थगरिमा ✳

डॉ. व्रजेन्द्रकुमारसिंहदेवः
सहायकाचार्यः, श्रीभगवानदासादर्श-संस्कृतमहाविद्यालयः, हरिद्वारम्

तीर्थशब्दस्याभिप्रायो वर्तते- 'त्रयाणाम् अर्थानां सिद्धिः' अर्थात् त्रयाणां पदार्थानां प्राप्तिरिति तीर्थमुच्यते। पदार्थश्चतुर्विधः- धर्मार्थकाममोक्षश्च। एतेषु धर्मकाममोक्षपुरुषार्थत्रयं मानवस्य कृते निष्पापमयं समुत्पादयति। तत्र धनस्य प्रयोजनं तीर्थे व्ययस्य कृते भवति। तीर्थं पवित्रमयं भवति। अनेन कथ्यते- तीर्थां कुर्वन्ति तीर्थानि। सामान्यतया नदी-पुष्करिणी-मन्दिर-भूमिप्रभृतयश्च तीर्थानि भवन्ति। तीर्थेषु दिव्यशक्तिरस्ति। त्रिविधानि तीर्थानि सन्ति- १. नित्यतीर्थम्, २. भगवदीयतीर्थम्, ३. सत्तीर्थञ्च।

१. **नित्यतीर्थम्**- कैलाश-मानसरोवर-ऋषिकेश-हरिद्वार-काशीप्रभृतिस्थानानि नित्यतीर्थानि। अत्र सृष्टे प्रारम्भाद् हि दिव्यमानवकारिणी शक्तिर्वर्तते। तथैव गङ्गा-यमुना-कावेरी-प्रभृतिनद्यः सङ्गम-स्थानानि च तीर्थानि।

२. **भगवदीयतीर्थम्**- एतेषु स्थानेषु देवता अवतारं नयन्ति। तासां देवतानां लीलाऽत्र वर्तते। अस्मिन् स्थाने भगवान् कस्यापि भक्तस्य कृते दर्शनं ददाति। एतदेव भगवदीयतीर्थमस्ति।

३. **सत्तीर्थम्**- यो जीवनमुक्त-देहातीत-परमभागवतमयः सत्पुरुषो भवति, तस्य शरीरं पञ्चभूतमयं नश्वरं भवेत्, परन्तु तस्मिन् शरीरे दिव्यगुणपरमाणुतत्त्वं सर्वदा बहिर्निस्सरति तथा च तदेव वस्तुना सह प्रभावः प्रदृश्यते। सन्तजनानां चरणयुगलं यत्र कुत्र व्रजति सा भूमिः तीर्थमुच्यते। सन्तजनानां जन्मभूमिः, साधनभूमिः, निर्वाणभूमिः, समाधिभूमिश्च प्रधानरूपे पावनमयी भवति। अनेन प्रकारेण विचार्यते चेत् तर्हि कैलाशात् कन्याकुमारीपर्यन्तं समस्तभारतभूमिः तीर्थं वर्तते।

## पुराणेषु तीर्थानां गरिमा

श्रीभागीरथी गङ्गा एकं पावनं तीर्थं भवति। यदुक्तं भागवतमहापुराणे-

**पुनाति कीर्तिता पापं दृष्ट भद्रं प्रयच्छति।**
**अवगाढा च पीता च पुनात्यखिलं कुलम्॥**

## हरिद्वारमहातीर्थम्

यद्यपि भारतदेशेऽनेकानि तीर्थस्थलानि सन्ति। तत्र तेषां तीर्थानां पृथक्-पृथक् माहात्म्यमितिहासादीनां वर्णनं दृश्यते। हरिद्वारमेकम् एतादृशं तीर्थस्थानं यत्र सप्त ऋषयः एकत्रैव एकस्मिन्नेव स्थाने तप कृतवन्तः। हरिद्वारतीर्थस्योल्लेखः विविधेषु पुराणेषु प्राप्यते। मत्स्यपुराणे कथनमस्ति यत् गङ्गा सर्वेषु स्थानेषु सुलभा परन्तु स्थानत्रयेषु दुर्लभा वर्तते। क्रमेण स्थानत्रयम्- हरिद्वार-प्रयाग-सागरसङ्गमश्च। यदुक्तं मस्त्यपुराणे-

**सर्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा।**
**हरिद्वारे प्रयागे च गङ्गासागरे दुर्लभा॥**

वामनमहापुराणानुसारं दक्षस्य यज्ञकार्यं हरिद्वारे हि बभूव। पुराणे हरिद्वारस्य कृते गङ्गाद्वारमिति कथ्यते। पद्मपुराणे हरिद्वारतीर्थस्य माहात्म्यस्योल्लेखो दृश्यते। तद्यथा-

**हरिद्वारं महापुण्यं शृणु देवर्षिसत्तम।**
**यत्र गङ्गा वहत्येव तत्रोक्तं तीर्थमुत्तमम्॥**

यत्र देवाः वसन्तीह ऋषयोमुनयस्तथा।
यत्र देवः स्वयं साक्षात् केशवो नित्यमाश्रितः॥
गङ्गातीर्थं महत्त्वपुण्यं सर्वपाप प्रणाशनम्।
लोकाः सर्वे वदन्त्येवमेतत् तीर्थोत्तमोत्तमम्॥

हरिद्वारतीर्थप्रसङ्गे पद्मपुराणे द्वाविंशतितमे अध्याये हरिद्वारतीर्थमाहात्म्यं प्राप्यते। यथा हि-

**अलकनन्दा तदा नाम गङ्गायाः प्रथमं स्मृतम्।**
**हरिद्वारे यदा याता विष्णुपादोदकी तथा।**
**तदैव तीर्थप्रवरं देवानामपि दुर्लभम्॥**
**यत्र गङ्गा महारम्या नित्यं वहति निर्मला।**
**एतत्कथानकं पुण्यं हरिद्वाराख्यमुत्तमम्॥**

हरिद्वारतीर्थं सर्वेषां तीर्थानां शिरोमणि अस्ति। पद्मपुराणस्य सप्तविंशतितमेऽध्याये हरिद्वारस्य माहात्म्यं वर्तते यत्- हरिद्वारतीर्थस्नानेन अश्वमेधयज्ञस्य तुल्यमुत्तमफलं प्राप्नोति। एवमपि स्वीक्रियते यत् पृथिव्यां हरिद्वारात् श्रेष्ठं तीर्थमन्यं किमपि नास्ति। हरिद्वारतीर्थं सर्वदा चतुर्वर्गफलप्राप्तिं प्रददाति। तथा हि-

**हरिद्वारस्य माहात्म्यमश्वमेधफलप्रदम्।**
**हरिद्वारस्य सदृशं शक्रप्रस्थ गतस्य वै॥**
**न तीर्थं पृथिवीलोके चतुर्वर्गफलप्रदम्॥**

हरिद्वारे ब्रह्मकुण्डं हरपदीस्थानं वा पवित्रतमं तीर्थस्थानं भवति। विषयेऽस्मिन् कथनं प्राप्यते यत् ब्रह्मणा अत्रैव तप कृतम्। अस्मिन् स्थानेऽव तस्य चरणयुगलं वर्तते। यदुक्तं स्कन्दमहापुराणे-

**श्रूयते च महाभाग! महापुण्य! सुकृतभिः।**
**तत्रैव गङ्गा निकटे पादुके ब्रह्मणः शुभे॥**

स्कन्दपुराणे कथनमस्ति यत्- ब्रह्मकुण्डम् एतद् हि महातीर्थं वर्तते। तीर्थमिदं सर्वा दुख-दरिद्रताः निवारयति। तीर्थमिदं समस्तपाप-नाशकं वर्तते। ब्रह्मकुण्डस्य स्नानं हि स्वर्गप्राप्ति साधनम् उच्यते। अत्र स्नानं कृत्वा शिवलोकमाप्नोति। यथा हि-

**सेतुमध्ये महातीर्थं गन्धमादनपर्वते।**
**ब्रह्मकुण्डमिति ख्यातं सर्वदारिद्र्यभेषजम्॥**
**दर्शनं ब्रह्मकुण्डस्य सर्वपापौघनाशनम्।**
**ब्रह्मकुण्डे सकृत्स्नानं वैकुण्ठप्राप्तिकारणम्॥**
**तदेतत्तीर्थमासाद्य स्नानं कुर्वन्ति ये नराः॥**

शिवपुराणानुसारं गङ्गाया आगमनस्य तिथिः गङ्गासप्तमी स्वीक्रियते। ऋषयः सूतमपृच्छन्। यथा हि-

**कथं गङ्गा समायाता वैशाखे सप्तमीदिने।**
**नर्मदाया विशेषेण सूतैतद वर्णय प्रभो॥**

कूर्मपुराणानुसार गङ्गातीर्थं हि सर्वपापान् दूरीकुर्वन् मुक्तिं प्रददाति। सिद्धक्षेत्रश्रेष्ठतीर्थद्वयं हि तपोवनमिव भवति। तद्यथा-

**यत्र गङ्गा महाभागा बहुतीर्थतपोवना।**
**सिद्धक्षेत्रं हि तज्ज्ञेयं नात्र कार्या विचारणा॥**
**क्षितौ तारयते मर्त्या नागास्तारयतेऽप्यधः।**
**दिवि तारयते देवांस्तेन सा त्रिपथा स्मृता॥**

अनेन प्रकारेण हरिद्वारतीर्थं भक्तजनानां शैवानां वैष्णवानाञ्च कृते मोक्षदायकं वर्तते।

### ऋषिकेशतीर्थम्

हरिद्वारस्य समीपे ऋषिकेशस्थानं बहूत्तमं तीर्थमस्ति। भगवान् रामः स्वभातृभिः सह अस्मिन् तीर्थे तप कृतवान्। कर्णप्रायेगे रामः, ऋषिकेशे भरतः, 'मुनि की रेती'ति स्थाने शत्रुघ्नः तप कृतवन्तः। ऋषिकेशस्य निकटे हि वसिष्ठस्य गुहा वर्तते। ऋषिकेशे गङ्गाऽऽगमनस्य महत्ता प्राप्यते। यथा हि-

**हृषीकाणामीशो मुनिभिरुपगीतोऽमरगणै,**
**हृषीकेशो यत्र प्रतिवसति विश्वैकभरणः।**

प्रदेशं तं मातर्भुवन परिपूं प्रविशसि,
हृषीकेशं दिव्यं विषयविषतापप्रशमनम्॥
अपि च –

वितन्वन्ती पूं हिमवति वितानं स्वयशसः
किरन्ती कान्तारे ध्वनितमभियानं स्वपयसः।
विधुन्वन्ती धैर्यं यमपुरपते पावनतया,
ऋषीणां सन्तापं शमयसि हृषिकेश! पुलिने॥
शुचिस्नात्वा प्रातः पुलिनमुपसृत्याम्भसि जनाः,
पुनानाः संप्रीत्या कुलगुरुजनानञ्जलि गतैः।
जलै पुण्यश्लोकै सुरधुनि सुधासार सरसै-
रूपस्कुर्वन्ति त्वां प्रणत शिरसा नन्य गतयः॥

स्वनिर्मलहृदयस्य परिचयः प्रदर्शयन् स्वयं गङ्गादेवी कथयति–

विकारं शैलानां मणि बहुल रत्नाकर चितं
प्रवाहै कर्षन्ती प्रचुरपयसां वैभवतले।
किरन्ती प्रक्षेपै र्विलुलितरजः पिण्डनिवहान्,
धरित्री सन्तापं हरसि भवतापं करुणया॥
मुमुक्षूणामन्तःकरण शरणे! पुण्यसलिले,
प्रसिद्धे सिद्धानामनवधि तपः साधनतले।
पवित्रे ते वामाञ्चलपरिसर-प्रान्त पुलिने,
सुविख्यात स्वर्गाश्रम भवनमत्रैव लसति॥
यथा कृष्णोऽवोचन्निखिलमविनाशि प्रवचनं,
तथैवार्या यत्र स्वयमपनयन्तः स्वविषयान्।
पिबन्ति प्रख्यातं भगवदनुगीतामृतरसं,
त्वदङ्गे तद्गीता भवनमभिरामं विलसति॥
चरन्ती सानन्दं हिमगिरिगृहान्तः परिसरे,
स्वभावात्स्वच्छन्दं सरलगिरि कन्येव सततम्।
धरन्ती भूभागे पदमपि परं वीक्ष्य मनुजान्,
अघोघै सन्तप्तानतिशय गम्भीरा प्रवहसि॥

अनेन प्रकारेण पुराणसाहित्ये प्रचुरतया तीर्थानां वर्णनं प्राप्यते। ●

# सुरवागमृता

डॉ. मिश्रोऽभिराजराजेन्द्रः
कुलपतिचरः, सनराइजविला लोअर समरहिताशिमला

न मृता, म्रियते न मरिष्यति वा
सुरवागमृता सुखदा वरदा
द्विषतां नियतिं रचयिष्यति वा!! ध्रुवा॥

निगमागमगीतिमयी रुचिरा,
रघुनाथकथामहिता मधुरा
पुनरद्य दशाननकर्मरतान्
घननादमुखान् निहनिष्यति वा॥ १॥

नरपाल – भगीरथ - सङ्कलिता
सुरसिन्धुरियं गगनाद्गलिता।
विशदाश्रममव्यविनाश - परान्
अभिशप्तजनान् गमयिष्यति वा॥ २॥

इयमार्षतपोनिधि - सञ्चयिनी
विपदां शमनी वसुधोज्जयिनी
इयमञ्चितसंस्कृति - कीर्तिकथा
पुनरद्य भुवं मदयिष्यति वा॥ ३॥

अमृतादधिकं परिपोषकरी
सुकृतादधिकं भवदोषहरी
पदबन्धरसामृत - चारुचयै-
श्चितिनीरसतां रसयिष्यति वा!
न मृता, म्रियते न मरिष्यति वा!!॥ ४॥

# ✷ उपनिषद्वाङ्मये अर्थप्राप्तिविद्या ✷

प्रो. मनुदेवबन्धुः
आचार्यो वेदविभागे गुरुकुल-काङ्गड़ी-विश्वविद्यालयः हरिद्वारम्

**मूलस्रोतः-** वैदिकवाङ्मयान्तर्गते वेद-ब्राह्मण-आरण्यक-उपनिषद्-वेदाङ्गग्रन्थानां समावेशः क्रियते। 'वेदोऽखिलो धर्ममूलम्' इत्युक्त्वा भगवान् मनुः वेदमाहात्म्यं प्रत्यपादयत्। 'वेद सत्य विद्याओं का पुस्तक है। वेद का पढ़ना-पढ़ाना और सुनना सुनाना सब आर्यों का परम धर्म है।' अनया उद्घोषणया सह महर्षिदयानन्दः वेदं सर्वोच्चपदं प्रत्यस्थापयत्। वेदानां दैनिक-स्वाध्यायेन इहलोके परलोके च कल्याणं भवति। ज्ञानकाण्ड-कर्मकाण्डनामकाधारयोर्वेदानां व्याख्यानमभूत्। ब्राह्मणग्रन्थाः कर्मकाण्डान्तर्गतं उपनिषद्ग्रन्थाश्च ज्ञानकाण्डान्तर्गतम् आगच्छति। उपनिषद्ग्रन्थानां स्वाध्ययेन परब्राह्मणः प्राप्तिर्भवति। इदं निर्विवादं सत्यमस्ति यद् उपनिषद्ग्रन्थाः पाठकान् साधकांश्च जन्ममरणचक्रात् मोचयित्वा मोक्षं प्रापयन्ति। भवबन्धनाद् दूरीकृत्य परमशान्तिं प्रति गमयन्ति। ईशोपनिषदः कथनं ध्यातव्यमेव-

**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥**[१]

हे मानव! संसारोऽयमीश्वरेणाच्छादितः। त्वं त्यागपूर्वकमस्य वस्तूनि उपभुंक्ष्व। धनं भुंक्ष्व। कस्यापि धनं प्रति न आकांक्षा धनमिदं प्रभोरेवास्ति परिश्रमपूर्वकं त्यागपूर्वकञ्च धनं भुंक्ष्व।

**अर्थपरकं चिन्तनम्-** उपनिषत्सु आध्यात्मिकचिन्तनेन सह आर्थिकचिन्तमपि प्राप्यते। तत्कालीनार्थपरकशब्देषु वित्त[२]-धन[३]-रै[४]-वसु[५]-आदिशब्दानां प्रयोगाः उपलभ्यन्ते। श्रीमन्थकर्मणः उपासना धनस्य प्राप्तये भवति स्म।[६] यमाचार्यः नचिकेतसं प्रलोभनकाले शतायुषपुत्रपौत्र-सुवर्ण-भूमण्डल-धन-स्थिर-आजीविकाप्रदानाय वचनं ददौ।[७] ब्राह्मणाः परिग्रहिणः आसन्। याज्ञवल्क्यस्य सम्पत्तिविभाजनमपि इमामेव वार्त्तां पुष्णाति।[८] बृहदारण्यकोपनिषदि सुस्पष्टमुक्तमस्ति यदा ब्रह्म विभूतियुक्तं कर्मकरणेऽसमर्थमभवत् तदा

---

१. यजुर्वेदः ४०.१, ईशोपनिषद् १

२. बृहदारण्यकोपनिषद् १.४.८, १.४.१७
३. तैत्तिरीयोपनिषद् १.११.१, छान्दोग्योपनिषद् १.११.३
४. बृहदारण्यकोपनिषद् ५.११.१, ईशोपनिषद् १८
५. बृहदारण्यकोपनिषद् ४.२.२४, वासुदानो विन्दते वसु य एवं वेद।, शाङ्करभाष्यम् वसुधनं सर्वप्राणिकर्मफलम्।
६. बृहदारण्यकोपनिषद् ६.३.२
७. कठोपनिषद् १.१.२३, शतायुषः पुत्रपौत्रान् वृणीष्व।
८. बृहदारण्यकोपनिषद् २.४.२

धनोपार्जनकारिणं वैश्यवर्णमरचयत्।[9] अस्मिन् प्रसङ्गे शङ्कराचार्यः महत्त्वपूर्णं तथ्यं समुद्घाटयाञ्चकार। तस्य कथनमस्ति यद् ब्रह्म कर्मसाधनभूतवित्तोपार्जनाय वैश्यान् रचयामास। वैश्याः गणाः आसन्। गणाः एकतासूचकाः।[10] वैश्यानां कार्यं कृषिकर्म-व्यापार-कुसीद-पशुपालनादिकमासीत्।

**कृषिः-** 'अन्नं ब्रह्म' इति कथयित्वा कृषिमहत्त्वं प्रतिपादितम्।[11] अतः बहु कुर्वीत 'इत्यनेनोपदेशेन सर्वे कृषकाः प्रभूतमन्नमुदपादयान्।[12] अन्नस्य रचना विधात्रा ज्ञानकर्मभ्यां कृता।[13] अनेन कथनेन प्रतीयते यद् अन्नोत्पादनार्थं विवेकश्रमौ उभावेव अपेक्षितौ आस्ताम्। आधुनिक-नवीन-वैज्ञानिकप्रयोगाः अस्यैव तथ्यस्य परिपोषिकाः सन्ति। हलस्य प्रयोगः ऋग्वेदादेव प्रचलितः आसीत्।[14] यजुर्वेदे हलाय 'सीर'शब्दः प्रयुक्तः।[15] कृषिसम्बन्धिकर्मसु कर्षण-वपन-लवन-निष्कर्षणादीनामपि उल्लेखो भवति।[16] अनेन सुनिश्चितरूपेणानुमातुं शक्यते यत् कृषिकर्म निर्विवादरूपेण समुन्नतमासीत्।[17] उपनिषत्कालं यावत् सामजस्य कृषकवर्गः कृषिकर्मणि प्रवृत्तः आसीत्। अस्मिन् खलु अधिकांशतः वैश्या आसन्। शूद्राणां श्रमस्य विनियोगं ते अस्यामेव दिशायां कुर्वन्ति स्म।[18] बृहदारण्यकोपनिषदि दशप्रकारकाणां ग्रामीणान्नानां प्रयोगो मिलति।[19] येषु व्रीहि-यव-तिल-माष-अणु-प्रियङ्गु-गोधूम-मसरू-खल्व-खलकुलादीनि अन्नानि प्राप्यन्ते। आचार्यसायणः खलकुलं सूपप्रकारं मन्यते।[20] अस्मिन् प्रसङ्गे आचार्यशङ्कर-आचार्यशिवशङ्कर-महात्मनारायणस्वामिभाष्याणि द्रष्टव्यानि सन्ति।[21]

**पशुपालनम्-** कृषिविकास-यातायात-दुग्ध-घृतादिपौष्टिकवस्तूनां सम्प्राप्तये पशूनां भूयसी महत्ता आसीत्। पशुसम्पन्नमानवः पशुमान् कथ्यते स्म।[22] यदि एकस्यापि पशोर्हरणं भवति स्म तदा

---

९. बृहदारण्यकोपनिषद् १.४.२, स नैव व्यभवत् स विशसृजत् यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति।

१०. बृहदारण्यकोपनिषद् (शांकरभाष्यम्) १.४.१२, स नैव व्यभवत् कर्मणे ब्रह्म तथा व्यभवत् वित्तोपार्जयितुरभावात्। त् विशमसृजत् कर्मसाधनवित्तोपार्जनाय....... गणशो गणं गणम् आख्यायन्ते कथ्यन्ते। गणप्राया हि विशः प्रायेण संहता हि वित्तोपार्जने समर्था न एकैकशः॥

११. छान्दोग्योपनिषद् ७.९.२, अन्नं ब्रह्म इत्युपास्ते। / तैत्तिरीयोपनिषद् ३.९.१, अन्नं वै ब्रह्म।

१२. तैत्तिरीयोपनिषद् ३.९.१

१३. बृहदारण्यकोपनिषद् १.५.२, मेधया तपसाऽजनयत् पिता।

१४. ऋग्वेदः १०.७१.२९

१५. यजुर्वेदः १८.७

१६. शतपथब्राह्मणम् १.६.१.२

१७. दि इकोनोमिक लाइफ आफ एंशियेण्ट इण्डिया, पृ. ९०

१८. उत्तरवैदिक समाज एवं संस्कृति, पृ. ४८

१९. बृहदारण्यकोपनिषद् ६.३.१३

२०. वैदिक इण्डेक्स, खण्ड-१, पृ. २१५

२१. बृहदारण्यकोपनिषद् (शांकरभाष्यम्) ६.३.१३

२२. बृहदारण्यकोपनिषद् १.४.१०, एकस्मिन्नेव पशावादीयमानेऽप्रियं भवति किमु बहुषु।

अप्रियं मन्यते स्म।[२३] स्वावश्यकता प्रपूरणायैव पशुप्रिया आसन्।[२४] तत्कालीन-पशुषु गवां महत्त्वपूर्णं स्थानमासीत्। उपहाररूपे गावो ब्राह्मणेभ्यो दीयन्ते स्म। गोदानपरम्परा विवाहसंस्कारेऽपि अस्ति।[२५] आचार्याः गाः कामयन्ते स्म[२६] महाराजजनकः महर्षियाज्ञवल्क्याय हस्तिसदृशीः अनडुह उत्पादयित्री गाः दातुमैच्छत्।[२७] जनक गवां शृङ्गेषु दश-दशसुवर्णखण्डानि बबन्ध।[२८] गवां पश्चात् उपयोगिपशुषु अश्वः आसीत्। सिन्धुदेशस्य अश्वाः प्रसिद्धा आसन्। एकेन प्रसङ्गेन प्रतीयते यद् गोसदृशाः अश्वा अपि पाल्यन्ते स्म।[२९]

**वस्त्रोद्योगः**- लोमयुक्तपशुभ्यः ऊर्णा निर्मीयते स्म। ऊर्णावस्त्राणि रञ्जयित्वा सज्जीक्रियन्ते स्म। एभ्यः आविकशब्दो लभ्यते।[३०] आर्यजनाः वयनार्थम् ऊर्णाप्रयोगं कुर्वन्ति स्म।[३१] वेदसंहितासु ऊर्णावस्त्रस्य उल्लेखः प्राप्यते। आलङ्कारिक-रूपेणोर्णावस्त्रस्य पुष्टिर्भवति।[३२] यद्यपि तन्तुशब्दः ऊर्णनाभिजालस्य रेशेभ्यः प्रयुज्यते स्म।[३३] तथापि अस्य वास्तविकार्थः सूत्रं विद्यते। सूत्रीवस्त्राणामभावो विद्यते। परन्तु सूत्रशब्दः अवश्यमेवोपलभ्यते। यस्याभिप्रायः सूतलीमात्राय ग्रहीतुं शक्यते। यस्योपयोगः बन्धनाय क्रियते स्म।[३४]

**धातूद्योगः**- उपनिषत्सु नैकप्रकाराणां धातूनां प्रयोगः प्राप्यते। येषु लोह-त्रपु-कांस्य-सीस-सुवर्ण-रजतादीनां समवेतकथनं लभ्यते।[३५] सुवर्णकारिकार्य-कर्त्ता पेशस्कारी कथ्यते स्म।[३६] पेशस्कारी पदे विद्वत्सु मतैक्यं न विद्यते। शङ्कराचार्यः इदं पदं सुवर्णकाराय प्रयुनक्ति।[३७] सुवर्णपत्राणि निर्मीयन्ते स्म।[३८] सुवर्णकारः स्वल्पां स्वल्पां सुवर्णमात्रां प्रगृह्य कल्याणतरं रूपं

---

२३. बृहदारण्यकोपनिषद् ४.५.६

२४. संस्कारविधिः, महर्षिदयानन्दः, विवाहसंस्कारः

२५. बृहदारण्यकोपनिषद् ३.१.२, गोकामा एव वयम्।

२६. बृहदारण्यकोपनिषद् ४.१.१-२

२७. बृहदारण्यकोपनिषद् ३.१.१

२८. बृहदारण्यकोपनिषद् ६.२.१, गवाम् अश्वानां दासीनां प्रावाराणाम्।

२९. बृहदारण्यकोपनिषद् २.३.६, यथा महारजनं वासो यथा पाण्डवो विक्रमम्।

३०. प्राचीन भारतीय वेशभूषा, मोतीचन्द्रः, पृ. १०

३१. ऋग्वेदः १.१५.४, २.३.६, १०.१०६.१

३२. बृहदारण्यकोपनिषद् २.१.२०, यथोर्णनाभिस्तन्तुनोच्चरेद्यथाग्नेः क्षुद्रा विस्फुल्लिङ्गाः।

३३. उपनिषत्कालीन समाज एवं संस्कृति, डॉ. राजेन्द्र प्रसाद त्रिवेदी, पृ. २७

३४. छान्दोग्योपनिषद् ४.१६.७

३५. बृहदारण्यकोपनिषद् ४.४.४, यद्यथा पेशस्करी पेशसो मात्रामुपादायान्यन्नवतरं कल्याणतरं रूपं तनुते।

३६. बृहदारण्यकोपनिषद् (शांकरभाष्यम्) ४.४.४, यथा पेशस्करी पेशः सुवर्णं तत्करोति इति पेशस्करी सुवर्णकारः।

३७. ईशोपनिषद् १५, हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।

३८. बृहदारण्यकोपनिषद् ४.४.४

निर्मापयति स्म।[39] एवं प्रतीयते यल्लघूनि आभूषणनि अत्यन्तचातुर्येण निर्मीयन्ते स्म।

**काष्ठोद्योगः-** दैनन्दिनोपयोगि-उपकरणेभ्यः प्रतीयते यत् काष्ठकार्यकर्त्तारोऽपि आजीविकार्थं सचेष्टाः आसन्। यज्ञपात्रेभ्यः उदुम्बरकाष्ठस्य प्रयोगो भवति स्म। येषु स्रुवा-चमस-जुहु-उपमन्थनी-आदीनां वर्णनं लभ्यते।[40] रथ-नौका-शकटादियानानाम् अनेकभागाः काष्ठेन सम्बद्धाः आसन्। येषां निर्माणं काष्ठकार्यकर्त्ता करोति स्म।[41]

**इतरे उद्योगाः-** दैनन्दिनोपयोगिपात्रेषु कांस्य-पात्राणामपि महत्त्वम् आसीत्। एषा पवित्रता सुरक्षिता आसीत्। रजस्वला स्त्री दिनत्रयपर्यन्तं कांस्यपात्रे भोक्तुं पातुं च न शक्नोति स्म।[42] अग्नये मृत्तिकापात्राणि प्रयुक्तानि भवन्ति स्म।[43] आसनानां कटानां च निर्माणमपि भवति स्म। कुर्चः एकः आसनविशेषः आसीत्।[44] शुभावसरेषु वाद्ययन्त्रवादनस्यापि व्यवसाय आसीत्। वीणां वादयित्वा जनाः धनवन्तो भवन्ति स्म।[45]

समाजस्य निर्धनवर्गः श्रीमतां गेहे राज्ञां गृहे च परिचरति स्म। श्वेतकेतुः यदा पाञ्चालानां सभायां गतस्तदा जैबलिप्रवाहणः सेवकैः परिचारयति स्म।[46] राज्ञां भवने नैके कर्मकरा आसन्। ते राजकीयव्यवस्थायां सहयोगं ददाति स्म। एतेषु प्रत्येनस-ग्रामीण-सारथीनां नामानि प्रमुखानि आसन्।[47]

**यातायातः-** उपनिषत्सु यातायतस्य वर्णनं बाहुल्येन कृतम्। वेदेभ्यः आर्याणां सामुद्रिकं ज्ञानं यात्राणामाभासश्च भवतः।[48] मार्गे यदि नदी-नालादिकम् आगच्छति तदा तस्योपरि सेतुनिर्माणं भवति स्म।[49] स्थलमार्गेभ्यः रथस्य[50] शकटस्य[51] अनसः[52] प्रयोगाः दीरदृश्यन्ते। कुली धनसम्पनाश्च रथान् प्रयुञ्जते स्म। राजानश्च वायुयानस्यापि प्रयोगं कुर्वन्ति स्म।

**व्यापारः-** वित्तोपार्जनार्थं वैश्याः व्यापारं कुर्वन्ति स्म।[53] व्यापारिणः श्रेष्ठिन् शब्देन ज्ञायन्ते स्म।[54] साम्प्रतं 'सेठ जी' इत्युच्यते। मैक्डानलानुसारेण[55]

---

३९. बृहदारण्यकोपनिषद् ६.७.१३

४०. बृहदारण्यकोपनिषद् ४.२.१, रथं वा नावं ........।

४१. बृहदारण्यकोपनिषद् ६.४.१३, यस्य जायाऽऽर्तवं विन्देत त्र्यहं कंसे न पिबेत्।

४२. बृहदारण्यकोपनिषद् ४.२.१

४३. बृहदारण्यकोपनिषद् ४.२.१, कूर्चादुपावसर्पन्नुवाच।

४४. छान्दोग्योपनिषद् १.७.६

४५. बृहदारण्यकोपनिषद् ६.२.१, जैबलि प्रवाहणं परिचार्यमाणम्।

४६. तद्यथा राजानमायन्तमुग्राः प्रत्येनसः सूतग्रामण्यः अन्यैः पानैरावसथैः प्रतिकल्पन्ते।

४७. ऋग्वेदः १.१७.७, ७.६.७, ३.३६.७/ यजुर्वेदः ६.२१, समुद्रं गच्छ स्वाहा। अन्तरिक्षं गच्छ स्वाहा।

४८. बृहदारण्यकोपनिषद् ४.१.२२

४९. बृहदारण्यकोपनिषद् ४.१.८

५०. बृहदारण्यकोपनिषद् ४.३.३५

५१. बृहदारण्यकोपनिषद् (शाङ्करभाष्यम्) ४.१.११

५२. कौषितकी उपनिषद् ४.२०

५३. द इकोनोमिक हिस्ट्री आफ एंशियेण्ट इण्डिया, पृ. १५७

५४. बृहदारण्यकोपनिषद् ६.१.१३, यथा महासुहयः सैन्धव पड्वीशशंकूनसंबृहेत्।

५५. बृहदारण्यकोपनिषद् २.४.१२, स यथा सैन्धवखिल्ये उदके प्रास्तमुदकमेवानुविलीयते।

अस्यार्थ: व्यापारिणां प्रयोगस्य आधारे औद्योगिकशिल्पानाञ्च आधारे वस्तुं शक्यते यत्तदानीं व्यापार: समुन्नत आसीत्। व्यापारिण: अश्वै: व्यापारं कुर्वन्ति स्म। सिन्धुदेशस्य अश्वानां प्रतिष्ठा उत्तमा आसीत्। तत्रत्यं लवणमपि उपयुज्यते स्म।[५६]

**विनिमय:**- विद्याग्रहणान्तरं दक्षिणारूपे गोप्रदानस्य विधि: प्रचलित: आसीत्। मुद्राणां स्वरूपं विवादास्पदमस्ति। केवलं निष्कपादयोश्चर्चा अवश्यं लभ्यते।[५७] राजा जनक: सहस्रगवां श्रृङ्गेषु दश-दश सुवर्ण-पादान् अबध्नात्। ते पादा: सुवर्णखण्डानि आसन्। निष्कस्यार्थ: आभूषणमपि क्रियते।[५८] सुवर्णखण्डानि पणकानां प्रागवस्थारूपे आसन्। साम्प्रतं सिक्का कथ्यते।[५९]

**उपसंहार:**- उपनिषदां स्वाध्यायेनेदं विदितं भवति यद् अद्य इव तत्कालीनमार्थिकं जीवनं विकसितं नासीत्। अद्य आधुनिक-तकनीकद्वारा बैंक द्वारा, रेलयान-ट्रकयान-जलयान-वायुयानै: व्यापार: क्रियते। अद्यतनीयो व्यापार: उपयोगश्च पूर्णरूपेण विकसितौ स्त:। उपनिषदां लक्ष्यं पूर्णशान्ति: मोक्षप्राप्ति: स्त:। ईश्वरप्राप्तिरेव एकमेव लक्ष्यमस्ति। पुनरपि अर्थप्राप्तिविद्या सर्वत्र दरीदृश्यते। तदानीन्तना: सर्वे जना: अर्थप्राप्तये प्रयतमाना: आसन् इति मे मति:। ●

---

५६. उत्तरवैदिक समाज एवं संस्कृति, पृ. २४

५७. छान्दोग्योपनिषद् ५.१३.१-२

५८. ऐतरेयब्राह्मणम् ८.२२, ऋग्वेद: ५.१९.३, निष्कग्रीव।

५९. उत्तरवैदिक समाज एवं संस्कृति, पृ. ६४

# ईश्वर: सर्वव्यापक:

**डॉ. रामकिशोरमिश्र:**
पूर्वोपाचार्य: संस्कृतविभागाध्यक्षश्च महामना-मालवीय-महाविद्यालय:, खेकड़ा (बागपत), उत्तरप्रदेश:

(१)

ईश्वर: सर्वजीवेषु तदात्मरूपेण स्थित:।
यो जीवं तिरस्करोति तस्मिन्नेश: प्रसीदति॥

(२)

य: परात्पृथक्स्वं वेत्ति स जानातीश्वरं कथम्?
य: पश्यति स्वं सर्वेषु स ईश्वरं हि पश्यति॥

(३)

यो न करोत्यहङ्कारं प्रसन्नस्तस्मिनीश्वर:।
ईश्वर: स सर्वव्यापी सर्वसंसारं रक्षति॥

(४)

य: करोति परे द्वेषं द्वेष्टि स ईश्वरं प्रति।
सेवते यो महारुग्णं स सदेश्वर: सेवते॥

(५)

या कुष्ठरोगिण: सेवा, सा सेवा परमात्मन:।
य: कुष्ठिघृणां कुरुते सेश्वरघृणा मन्यते॥

(६)

त्वमेवाऽऽशा विश्वासो मे त्वमाकाशो वसुन्धरा।
त्वं प्रकृतिर्मे प्राणास्त्वं त्वं सर्वमीश! रक्ष माम्॥

(७)

स जनको जननी च सोऽध्यापक: स च गुरु:।
सोऽस्ति मित्रं स च भार्या स च पुत्रोऽस्ति तारक:॥

(८)

परमात्मन्! नमस्तुभ्यं सर्वजीवसुरक्षक!
त्वामीश! सर्वजीवेषु पश्यामि सर्वव्यापकम्॥

●

# ✷ महाभारते विदुरनीतिमहत्त्वम् ✷

प्रो. सत्यदेवनिगमालङ्कारः
आचार्यः अध्यक्षश्च, श्रद्धानन्दवैदिकशोधसंस्थानम्, गुरुकुल-काँगड़ी-विश्वविद्यालयः हरिद्वारम्

महाभारते विदुरः धर्मावताररूपेण वर्णितः। अयं बुद्धिमान्, नीतिमान्, विद्वान्, भगवद्भक्तश्चास्ति। अयं निर्भीकः सत्यवक्ता चास्ति। त्रिष्वपि लोकेषु विदुरसमः धर्मपरायणः मानव आत्मद्रष्टा च नास्ति। वैशम्पायनः जन्मेजयं विदुरविषये इयं विषयमेव ज्ञापयति-

**त्रिषु लोकेषु न त्वासीत् कश्चित् विदुरसम्मितः।**
**धर्मनित्यस्तथा राजन्! धर्मे च परमं गतः॥**[1]

विदुरः धृतराष्ट्रादीन् पुरुषान् सन्मार्गं दर्शयति। आत्मकल्याणार्थं समग्रमपि जगद् त्याज्यं भवति। इमं विषयं विदुरः उपदिशति-

**त्यजेत् कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत्।**
**ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥**[2]

कुलार्थे मनुष्यः त्यक्तव्यः, ग्रामार्थे कुलं त्यक्तव्यम्, देशार्थे ग्रामः त्यक्तव्यः, आत्मार्थे पृथिवी त्यक्तव्या। यः मानवः बलवता सह विरोधं करोति, स्वयञ्च साधनहीनो भवति, यस्य सर्वस्वं विनष्टं जातं भवति, यः कामी अस्ति, चोरो वास्ति, स रात्रौ न स्वपिति-

**अभियुक्तं बलवता दुर्बलं हीनसाधनम्।**
**हृतस्वं कामिनं चोरमाविशन्ति प्रजागराः॥**[3]

संसारे ये मानवाः धनिनो भूत्वाऽपि धनदानं न कुर्वन्ति, दरिद्रीभूयोऽपि कष्टं न सहन्ते, इमौ द्वौ प्रकारकौ पुरुषौ जले निवेष्टव्यौ गले दृढां शिलां बद्ध्वा-

**द्वावाम्भसि निवेष्टव्यौ गले बद्ध्वा दृढां शिलाम्।**
**धनवन्तमदातारं दरिद्रं चातपस्विनम्॥**[4]

विदुरः धृतराष्ट्रं समयोचितं वाक्यमुपदिशति-

**न सा सभा यत्र न सन्ति वृद्धा,**
**न ते वृद्धा ये न वदन्ति धर्मम्।**
**नासौ धर्मो यत्र न सत्यमस्ति,**
**न तत् सत्यं यच्छलेनानुविद्धम्॥**[5]

यस्यां सभायां वृद्धाः न सन्ति, सा सभा सभा न भवति, ये धर्मं वदन्ति, ते वृद्धा वृद्धा न सन्ति, यः सत्ये न प्रतिष्ठितः भवति, स धर्मो न भवति, यस्मिन् सत्ये छलं भवति तत् सत्यं न भवति। अग्रे विदुरः उपदिशति धृतराष्ट्रं राजानम्-

**लभ्यते खलु पापीयान् नरो नु प्रियवागिह।**
**अप्रियस्य हि पथ्यस्य वक्ता श्रोता च दुर्लभः॥**[6]

अस्मिन् संसारे यः सदा मनोहारिवचनं वदति परन्तु तत् पथ्यं न भवति, तदा स मनुष्यः

---

१. महाभारतम्, आदिपर्व १०८.२२
२. महाभारतम्, उद्योगपर्व ३७.१७
३. महाभारतम्, उद्योगपर्व ३७.३३
४. महाभारतम्, उद्योगपर्व ३३.६०
५. महाभारतम्, दाक्षिणात्यप्रति सभापर्व ६.७
६. महाभारतम्, सभापर्व ६४.१६

पापीयान् भवति। अतो हे राजन् अप्रियस्य पथ्यस्य वक्ता श्रोता च दुर्लभः भवति। अग्रे महान् नीतिज्ञः विदुरः पण्डितलक्षणविषयमधिकृत्य विज्ञापयति–

**हितं यत् सर्वभूतानामात्मनश्च सुखावहम्।**
**तत् कुर्यादिश्वरे ह्येतन्मूलं सर्वार्थसिद्धये॥**[७]
**क्रोधो हर्षश्च दर्पश्च ह्रीः स्तम्भो मान्यमानिता।**
**यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते॥**[८]
**यस्य कृत्यं न जानन्ति मन्त्रं वा मन्त्रितं परे।**
**कृतमेवास्य जानन्ति स वै पण्डित उच्यते॥**[९]
**यस्य कृत्यं न विघ्नन्ति शीतमुष्णं भयं रतिः।**
**समृद्धिरसमृद्धिर्वा स वै पण्डित उच्यते॥**[१०]

सर्वप्राणिभ्यः हितं सुखकरम् अस्ति तद् ईश्वरार्पणं कुर्यात्। सम्पूर्णसिद्धीनाम् अयमेव मूलमन्त्रः अस्ति। यं किञ्चित् क्रोधः, हर्षः, गर्वः, लज्जा, उद्दण्डता, स्वमानिता–आदिगुणाःन व्यथयन्ति, न भ्रष्टं कुर्वन्ति, सः पण्डितो भवति। यस्य कृत्यं मन्त्रं मन्त्रितं कार्यं मानवाः पूर्वं न जानन्ति, स पण्डितो भवति। कार्ये कृते तस्य रहस्यम् उद्घाटितं भवति। यस्य पुरुषस्य कृत्यं शीतमुष्णं भयं रतिः समृद्धिः असमृद्धिर्वा न विघ्नन्ति, न विनाशयितुं समर्थाः सन्ति, स पण्डितो भवति।

**क्षिप्रं विजानाति चिरं शृणोति,**
**विज्ञाय चार्थं भजते न कामात्।**
**नासम्पृष्टो व्युपयुङ्क्ते परार्थे,**
**तत् प्रज्ञानं प्रथमं पण्डितस्य॥**[११]

**नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।**
**आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः ॥**[१२]
**निश्चित्य यः प्रक्रमते नान्तर्वसति कर्मणः ।**
**अवन्ध्यकालो वश्यात्मा स वै पण्डित उच्यते ॥**[१३]

यः मानवः कमपि विषयं ध्यानेन शृणोति, श्रुत्वा च तं विषयम् अहङ्कारयुक्तः न जायते, अपृच्छन् अपि अन्यान् न बोधयति, एतादृशः मानवः प्रथमदृष्ट्या पण्डितो भवति। ये नराः अप्राप्यम् अलभ्यं न अभिवाञ्छन्ति, न च शोचितुम् इच्छन्ति, कदाचिदपि आपत्सु न मुह्यन्ति, एतादृशाः नराः पण्डिताः भवन्ति। ये मानवाः सम्यक् प्रकारेण पूर्वं निश्चित्य कार्यम् आरभन्ते, कार्यमध्ये आपत्सु समागतासु अपि समारब्धं कार्यं न परित्यजन्ति, समयं व्यर्थमेव न विनाशयन्ति, चित्तं च वशमानयन्ति, ते पण्डिताः भवन्ति।

**न प्रहृष्यत्यात्मसन्माने नावमानेन तुष्यति।**
**गाङ्गो ह्रद इवाक्षोभ्यो यः स पण्डित उच्यते॥**[१४]

यः कश्चित् आत्मसम्माने सति न प्रहृष्यति, अपमाने सति न सन्तप्तो भवति, गङ्गाजलमिव यस्य चित्तं क्षोभतां न गच्छति अर्थात् यस्य मनः दोलायमानं न भवति, स पण्डितो भवति।

**श्रुतं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रुतानुगा।**
**असम्भिन्नार्यमर्याः पण्डिताख्यां लभेत सः॥**[१५]

यस्य विद्या बुद्धिमनुसरति, यस्य बुद्धिः विद्यामनुसरति, यः कोऽपि शिष्टपुरुषमर्यादां नोल्लङ्घयति, एतादृशः नरः पण्डितपदवीं

---

७. महाभारतम्, उद्योगपर्व ३७.४०
८. महाभारतम्, उद्योगपर्व ३३.१७
९. महाभारतम्, उद्योगपर्व ३३.१८
१०. महाभारतम्, उद्योगपर्व ३३.१९
११. महाभारतम्, उद्योगपर्व ३३.२२
१२. महाभारतम्, उद्योगपर्व ३३.२३
१३. महाभारतम्, उद्योगपर्व ३३.२४
१४. महाभारतम्, उद्योगपर्व ३३.२६
१५. महाभारतम्, उद्योगपर्व ३३.२९

प्राप्नोति। **द्यूतं मूलं कलहस्याभ्युपैति मिथो भेदं महते दारुणाय। यथा स्थितोऽयं धृतराष्ट्रस्य पुत्रो दुर्योधनः सृजते वैरमुग्रम्।**[१६] हे राजन्! द्यूतं मूलमस्ति कलहस्य, द्यूतमेव महते दारुणाय भवति। हे धृतराष्ट्र! तव पुत्रः दुर्योधनः द्यूतमाश्रयित्वा भयानकं वैरं समुत्पादयति।

**नाभिनन्दे नृपते प्रैषमेतं मैवं कृथाः कुलनाशाद् बिभेमि।**
**पुत्रैर्भिन्नैः कलहस्ते ध्रुवं स्यादेतच्छङ्के द्यूतकृते नरेन्द्र!**[१७]

हे राजन्! अहं भवतः इमम् आदेशं न स्वीकरोमि, द्यूतक्रीडनाय पाण्डवानाम् आह्वानम् अहं न करिष्यामि। अनेन समस्तकुलस्य विनाशो भविष्यति, अस्य भयं मां व्यथयति। अहं प्रसीदामि दुर्योधनस्य दुःशासनस्य च व्यवहारान् दृष्ट्वा। अतः स्वपुत्रान् अनुशास्तु।

**असंत्यागात् पापकृतामपापांस्तुल्यो दण्डः स्पृशते मिश्रभावात्।**
**शुष्केणार्द्रं दह्यते मिश्रभावात् तस्मात् पापैः सह सन्धिं न कुर्यात्॥**[१८]

धृतराष्ट्राय उपदिशति विदुरः यत् हे राजन्! कदाचिदपि पापात्मभिः सह मित्रतां न कुर्यात्, यतोहि अनेन कर्मणा ये साधवः सन्ति तेऽपि पापकर्मकरैः सह दण्डभाजः भवन्ति। यथा शुष्कैः काष्ठैः सह आर्द्राणि काष्ठानि अपि भस्मीभूताः भवन्ति।

एवम्प्रकारेण विदुरनीतौ मङ्गलकारिणः, मानवकल्याणकारिणः उपदेशाः सर्वसाधारण-भाषायाम् उपवर्णिताः सन्ति, ये मानवान् सुखमार्गं निर्दिशन्ति।●

---

१६. महाभारतम्, सभापर्व ६३.१
१७. महाभारतम्, सभापर्व ५७.३
१८. महाभारतम्, उद्योगपर्व ३४.७०

# धरां मातृभूमिं भजामो मुदा

**श्री. सर्वेशकुमारतिवारी**
श्रीचेतनज्योतिसंस्कृतमहाविद्यालयः हरिद्वारम्

(१)
धरां मातृभूमिं भजामो मुदा।
नमामो नमामो नमामो वयम्॥

(२)
कला नाटकानां मनोहारिणी,
प्रवाहे कवीनां रसैः वर्धिते।
धृतेः मानवानांमहो सत्पथे,
विभा भाति यत्रास्ति सा निश्चला॥

(३)
शस्यशाकादिभिः सौख्यदा कामदा,
पद्मरागादिरत्नैरहो भूषिता।
रक्तपीतादिवर्णैः प्रसूनैः सदा,
दर्शनीया प्रभा तादृशीं मातरम्॥

(४)
वायुवेगेन वै देहकान्तिप्रदाम्,
कानने तां पिकैः कूजितां हर्षदाम्।
आम्ररम्भावटैः शोभितां शाश्वतम्,
गुञ्जितां भो ! द्विरेफैश्च मे मातरम्॥

(५)
कार्यदक्षं रिपुं प्राप्य ते निर्भयाः,
यत्र वीराः रणे भीषणे सम्मुखे।
रक्तपातैः धरां रञ्जकाः पूजकाः,
कीर्तिताः कौमुदी कारकाः कोविदैः॥

(६)
गान्धिनः सेवकैः पूजितां शाश्वतं,
देशभक्तैश्च प्राणार्पणैः रक्षिताम्।
वन्दनीयां सुरैः दर्शनीयां नरैः,
संश्रयेऽहं हृदा मातरं भारतम्॥
●

# ✷ उपनिषदां वैशिष्ट्यम् ✷

कु. पूजारानी
शोधच्छात्रा- संस्कृतविभागे, कन्यागुरुकुलपरिसरे गु.कां.वि.वि. हरिद्वारम्

मनुष्य: सांसारिकदु:खेषु सन्तप्तो भूत्वा सृष्टेरादिकालादेव परमशान्तेस्तथा च शाश्वतसुखस्यान्वेषणं करोति। सांसारिकभोगानां सुखानि क्षणिकानि नश्वराणि च भवन्ति। तेषु शाश्वतसुखानामाशा मरुमरीचिकासु जलान्वेषणमिव भवति। सांसारिकभोगानां चोपभोगं कुर्वन् मानवो निखिलं जीवनं यापयति, किन्तु परमसुखं नैव प्राप्यते। महाराजभर्तृहरिणा साधूक्तम्- **भोगा न भुक्ता वयमेव भुक्ता:।**[१] अर्थात् मानवा: भोगा: भोक्तुं न शक्यते अपितु भोगा: वयमेव भुज्यन्ते। जीवनमेवमेव नष्टा भवन्ति परन्तु भोगकामानां तृप्तिर्न भवति।

महर्षिमनुनाऽप्येवमेवोक्तम्- **न जातु काम: कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥**[२] कदापि भोगकामनानां शान्तिर्न भवति प्रत्युत कामनानां वृद्धि: तेनैव प्रकारेण भवति यथा घृतेनाग्नि: प्रचण्डो भवति। धनधान्यादिसम्पन्नदेशोऽप्यस्य प्रमाणमस्ति। यतोहि तेषु देशेषु भौतिकसुखानि बहूनि सन्ति परं सुखशान्ति: कुत्र?

उपनिषद्यपि साधूक्तम्- **'न वित्तेन तर्पणीयो मनुष्य:।'**[३] अर्थात् मनुष्य: सांसारिकधनै: पदार्थैश्च कदापि तृप्तो न भवति। समस्तवैदिकदर्शनानामपीदमेव लक्ष्यम् अस्ति यच्छाश्वतं सुखं कथमुपलभेत्। जगत: प्राचीनतमपुस्तके वेद उक्तं यदीश्वरीयज्ञानस्य मोक्षप्राप्ते: परमसुखस्य साधनं तद्धर्मानुष्ठानं कुर्वता शुद्धान्त:करणं कृत्वा परब्रह्मणो ज्ञानमेवास्ति। वेदेषूक्तम्- **तमेव विदित्वातिमृत्युमेति नान्य: पन्था विद्यतेऽयनाय।**[४] **यस्य छायाऽमृतं यस्य मृत्यु:।**[५]

अर्थात् परब्रह्म ज्ञात्वा दु:खेभ्य: निवृत्तिं प्राप्य मोक्षं प्राप्तुं शक्नुम:। अस्माद्भिन्नं किमप्युपायो नास्ति। यतोहि तस्य ब्रह्मणो ज्ञानमेव मोक्षसुखदायकोऽस्ति तथा यस्य ब्रह्मणोऽकृपा हि समस्तदु:खानां कारणं भवति। तद् ब्रह्म प्राप्तुं ज्ञातुं चर्षय: मुनयश्च सम्पूर्णं जीवनं तप: कृत्वा यद् ब्रह्मज्ञानं प्राप्तं तस्य संग्रह एवोपनिषद्ग्रन्थेष्वस्ति। एतस्मात् कारणादेवोपनिषदां ब्रह्मज्ञानस्य सर्वोत्कृष्टानि ग्रन्थानि स्वीक्रियन्ते।

अध्यात्मविद्याया रहस्यप्रतिपादका वेदभागा उपनिषद: कथ्यन्ते। तासु महर्षय: आध्यात्मिक्या विद्याया गूढतमानां रहस्यानां विशदतया विचारं कुर्वाणा: प्राप्यन्ते। वेदान्तदर्शनसाहित्ये त्रय:

---

१ भर्तृहरिशतकम् ३.१२
२ श्रीमदभागवतपुराणम् ९.१९
३ कठ. उप. १.१.२७
४ यजु० ३१.१८
५ यजु० २५.१३

प्रस्थानग्रन्था: सन्ति। ते वेदानवलम्बमाना मानवजीवनस्य चरमं लक्ष्यं तत्प्राप्ति-साधनञ्चोपदिशन्ति। त्रिषु प्रस्थानग्रन्थेषु श्रेष्ठत्वादुपजीव्य-ग्रन्थत्वाच्चोपनिषद: प्रथम-प्रस्थानत्वेन गृह्यन्ते। वेदानां चत्वारो भागा: सन्ति संहिता-ब्राह्मण-आरण्यक-उपनिषद्रूपा:। तत्र सर्वान्तेऽस्या: प्रवचनं जातं तस्मादिमा: वेदान्तनाम्ना प्रसिद्धा: सन्ति। अथवा वेदानां परिछिन्नवृत्तिज्ञानानाम् अन्त आत्यन्तिकीनिवृत्तिर्येन स वेदान्त:। यत: नित्यज्ञानस्वरूपेणावस्थानं मोक्षो भवति। कतिचनोपनिषदो गद्यात्मिका:, कतिचन पद्यात्मिका:, कतिचन गद्यपद्योभयात्मिकाश्च सन्ति। आसूपषित्स्वेव वेदस्य सर्वोत्कृष्टं सारतत्त्वं प्रधानलक्ष्यञ्च निहितमस्ति। उपनिषदोऽस्माकं भारतीयाध्यात्मचिन्तनस्य मूलस्रोतांसि सन्ति, याभि: भारतीयदर्शनस्य विभिन्ना धारा नि:सृता:।

औपनिषदीयै ऋषिभिरन्विष्टानां महत्तमानां सूक्ष्मनिष्कर्षाणां सार्वकालिकं महत्त्वमस्ति। आधुनिकविचारधाराया अनेका: प्रवृत्तय: औपनिषदिकतत्त्वसिद्धान्तै: प्रभाविता: सन्ति। भारतीयं जीवनं, धर्म:, दर्शनन्तु पूर्ण-रूपेणोपनिषदीय - चिन्तनेनानुशासितमेवास्ति। उपनिषत्सु वर्णितानि तथ्यानि सिद्धान्तश्चाद्यापि पूर्ववत्प्रामाणिका: सन्ति। इदमेव कारणमस्ति यद्विचारेषु, दृष्टिषु, मूल्येषु चैतावता परिवर्तनेनापि विदुषामाकर्षणमुपनिषदं प्रति कथमपि न्यूनं नाभवत्। उपनिषदां समुन्नतविचारा उदात्तचिन्तनानि चाद्यापि प्रबुद्धानध्येतॄन् आश्चर्यचकितान् मुग्धान् च कुर्वन्ति। उपनिषदामध्ययनं भारतीयसंस्कृते आध्यात्मिकस्वरूपस्य सत्यपरिचयाकमस्ति। आसां विचारशक्तय आध्यात्मिकजिज्ञासुजनान् गन्तव्यम् प्रति प्रेरयन्ति। उपनिषदां गौरवविषये डॉ. सर्वपल्ली राधाकृष्णन् महोदयस्य कथनस्योल्लेख एवात्रालं भविष्यति- **"उपनिषदामेतादृश आदर एतदर्थं नास्ति यत् ते श्रुतेरुत प्रकटीभूतस्य साहित्यस्यैको भागोऽस्ति, तस्मात् विशिष्टं स्थानं भजते, अपित्वस्य कारणमिदमस्ति यदिमा: स्वीयाक्षयार्थवत्तयाऽऽत्मिकशक्त्या च भारतवासिनामन्तर्दृष्टिं बलं च प्रेरयन्ति"** इति। उपनिषदोऽतिसरलशैल्या तत्त्वं ग्राहयन्ति, तेन तासां महत्त्वं लोकप्रियत्वं चानुदिनमवर्धत। उपनिषदृषीणामाध्यात्मिकविचाराणां मनोज्ञो बहुमूल्यशाली च महान् कोषोऽस्ति।

उपनिषच्छब्दस्य योगिकोऽर्थोऽप्यस्या वार्ताया: पुष्टिं करोति। शब्देऽस्मिन् **"उप"** तथा **"नि"** उपसर्गद्वयं तथा **'षद्लृ'** धातु वर्त्तते। यस्यार्थोऽस्ति- **"उप सामीप्येन नितरां सीदन्ति प्राप्नुवन्ति परं ब्रह्म यया विद्यया सा उपनिषद्"।**

अर्थात् उपनिषत्सा विद्याऽस्ति यया परब्रह्मण: स्वरूपं प्राप्तुं शक्यते।

आद्यगुरुशंकराचार्येणोपनिषदो व्याख्यैवं कृतम्- **"सेयं ब्रह्मविद्या उपनिषद् वाच्या संसारस्यात्यन्तावसादनात् उपपूर्वस्य सदेस्तदर्थत्वात् ग्रन्थोऽप्युपनिषद्"**

विद्येयमत्यन्तगूढकारणेन "रहस्य" नाम्नाऽपि ज्ञायते। यथोक्तं महाभाष्ये- **"चत्वारो वेदा: साङ्गा: सरहस्या बहुधा भिन्ना:"**[६] महर्षिपाणिना अपि **"जीविकोपनिषदावौपम्ये"** [७] सूत्रेऽस्मिन् **"उपनिषत्"** शब्दस्य **"गोपनीय:"**

---

६ महाभाष्ये पस्पशाह्निके

७ अष्टाध्यायी १.४.६९

इत्यर्थे प्रयुक्तवान्। **"उपनिषत्कृत्य गत:"** अर्थात् कामपि वार्तां गोपायनं कृत्वा गतोऽथवा 'रहस्यात्मकं' इति कृत्वा गत:। अनेनापि उपनिषद्विद्याया रहस्यात्मकं स्वरूपमेव प्रकटं भवति। कठोपनिषदि नचिकेतायास्तृतीय-वररूपेणात्मविद्याया: पृष्टे सति यमाचार्येणानेके प्रलोभना दत्ता:, अनन्तरं सुयोग्यं ज्ञात्वा तस्मा आत्मविद्याया उपदेशं कुर्वनस्या विद्याया विषये प्रोवाच- **आश्चर्योऽस्य वक्ता कुशलोऽस्य लब्धाऽश्चर्ये ज्ञाता कुशलानुशिष्ट:।**[८]

अस्या आत्मविद्याया: श्रोतारो वक्तारश्च दुर्लभा भवन्ति। कच्चिदात्मतत्त्वस्य साक्षात्कर्त्ता एवास्या विद्याया उपदेशं कर्तुं शक्नोति। अन्येषां पुरुषणामत्र गतिर्न भवति। तथाहि **'नायमात्मा प्रवचनेन लभ्य:'**[९]। अस्या उक्त्या अनुसारेणात्मज्ञानं परमेश्वरस्य कृपयैव प्राप्तुं शक्यत इति ज्ञायते।

भारतीयतत्त्वद्रष्टार: परमात्मद्रष्टार ऋषयो मुनयश्चास्या: रहस्यात्मक- विद्याया: पूर्णरूपेण ज्ञानं प्राप्य विश्वं सर्वप्रथममुपदेशं दत्तवन्त:। अनेन कारणेनैव भारतदेशं विश्वस्य दार्शनिका अधुनाऽप्यध्यात्मक्षेत्रे विश्वस्य गुरुं मन्यन्ते। एतामुपनिषद्विद्यामधीत्य न केवलं वैदिक-धर्मिणोऽपितु विधर्मिणस्तथा वैदेशिका अपि मन्त्रमुग्धा जात:। इस्लामधर्मावलम्बिनां दाराशिकोह:, मंसूर:, सर्मद:, फैजी, बुल्लाशाह इत्यादीनामुपनिषद्भक्तानां को भारतीय: परिचयो नास्ति। दाराशिकोह औपनिषदसिद्धान्तानेव न स्वीकृतमपितु फारसी भाषायामप्यनुवादं कृतवान्। एवञ्च तान् सिद्धान्तान् स्वजीवनस्य सर्वस्वमपि स्वीकृतवान्। मंसूर: सर्मदश्च स्वशिरो दत्वाऽप्युपनिषत्सिद्धान्तान् त्यक्तुं नेष्टवान्। पाश्चात्त्यविद्वान्स: मैक्समूलर:, शोपेनहार:, गोल्डस्टकरश्चोपनिषदां मुक्त-कण्ठेन प्रशंसां कृतवन्त:।

पाश्चात्त्यविदुषां समक्षं उपनिषदलौकिक: प्रकाश: समागत: तदा ते विद्वान्सोऽमुह्यन्। जर्मन विद्वान् पालडायसन-महोदयेन स्वकृते 'Philosophy of the Upanishads' नामक ग्रन्थे उपनिषदो विचार इत्थं प्रशंसित: 'उपनिषत्सु या दार्शनिककल्पना सा न केवलं भारतेऽपितु समस्तविश्वेऽप्यतुलनीया'।

फ्रेडरिकश्लेगनमहोदयेन स्वकीयभावा अभिव्यक्ता:-**उपनिषदां समक्षं यूरोपीयतत्त्वज्ञानं प्रचण्डमार्त्तण्डस्याग्रे प्रदीपदर्शनमेव।**

प्रसिद्धदार्शनिक: शोपेनहार उपनिषदां गुणानुवादं कुर्वन्नाह- **'एता उपनिषदो मम जीवनस्य शान्तिसाधिका:। मरणानन्तरं चापि शान्तिसाधिका भविष्यन्ति॥'** (It has been the solace of my life and will be the solace after my death too.)

अत उपनिषत्सु ब्रह्मविद्याया: परमानन्दावाप्ते: त्रिविधदु:खनिवृत्तिरूपस्यैव मोक्षस्योपदेश:। मानवमात्रस्यैहिक-कल्याणमामुष्मिकमंगलञ्च सम्पादयितुमेतासां महत्त्वमद्वितीयमक्षुण्णम् निर्विवादं च।●

---

८ कठ. उप. २.७
९ मुण्ड. उप. ३.२.४

# ✳ गङ्गाया अवतरणम् ✳

डॉ. रामकिशोरमिश्रः
पूर्वोपाचार्यः विभागाध्यक्षचरश्च, महामना-मालवीय-महाविद्यालयः खेकड़ा (बागपत) उत्तरप्रदेशः

(१)
पूर्वजो रामचन्द्रस्य महीपः सगरोऽभवत्।
सुमतिः केशिनी चाऽत्र द्वे राज्ञ्यावास्तां तस्य हि॥

(२)
असमञ्जसः केशिन्याः समुत्पन्नः पुत्रोऽभवत्।
षष्टिसहस्राणि चाऽऽसन् सुमतेरुत्पन्नाः सुताः॥

(३)
एकदाऽत्र सगरेण चाऽश्वमेधयज्ञः कृतः।
इन्द्रेण चोरितः सोऽश्वः कपिलाऽऽश्रमे बन्धितः॥

(४)
सगरपुत्रैः पृथिव्याः कोणः कोणश्चान्वेषितः।
कपिलाश्रमे तं दृष्ट्वा तेऽधावन् हन्तुं मुनिम्॥

(५)
ताञ्च हत्याकरान्मत्वा मुनिना ते भस्मीकृताः।
असमञ्जस उद्दण्डः सगरेण निष्कासितः॥

(६)
अंशुमान् तान्मृतान् ज्ञात्वा गतवान् कपिलाश्रमम्।
पूज्य मुने! नमस्तुभ्यं तेनाऽत्र कपिलः स्तुतः॥

(७)
अंशुमन्! नयाऽश्वं त्वं पितामहयज्ञं पूरय।
गङ्गामानीय तोयेन पितृव्यमुक्तिं कारय॥

(८)
यज्ञं पूर्णं दृष्ट्वा राजा राज्यमंशुमते ददौ।
ततः पुत्रदिलीपाय राज्यं दत्त्वा स तप्तवान्॥

(९)
स्वर्गाच्च गङ्गामानेतुं तेन ब्रह्मतपः कृतः।
तपश्च कुर्वतस्तस्य वने शरीरान्तोऽभवत्॥

(१०)
दिलीपः सुताय राज्यं भगीरथाय दत्तवान्।
ततो वने स गङ्गायै कृतवान् ब्रह्मणस्तपः॥

(११)
तपस्यायामेव तस्य रुद्धाऽभवद् हृदो गतिः।
समर्प्य राज्यं पुत्राय भगीरथो वनं गतः॥

(१२)
एकपादेन तेनापि ब्रह्मघोरतपः कृतम्।
अन्ते वरयाचनाय ब्रह्मणा दत्तं दर्शनम्॥

(१३)
पितामह! षष्टिसहस्रपूर्वजानां मुक्तये।
भूमौ गङ्गां प्रेषयितुं भगवन्! स्वकृपां कुरु॥

(१४)
प्रेषयामि गङ्गां किन्तु तस्या वेगं को रोत्स्यति?
तस्या वगमवरोद्धुं त्वं शङ्करं प्रसादय॥

(१५)
तपसा चैकपादेन शङ्करः प्रसन्नोऽभवत्।
ब्रह्मत्यक्तगङ्गावेगं जटास्वरुद्ध शङ्करः॥

(१६)
भुवि चैकजटातो गङ्गांधारां शिवस्त्यक्तवान्।
मार्गे जह्नुरपिबत्तां जंघातो निरसारयत्॥

(१७)
जाह्नवी भागीरथी कपिलाश्रमं साऽवाहयत्।
तेन गङ्गाप्रवाहेन विमुक्ताः सगरात्मजाः॥

(१८)
रामकिशोरमिश्रेण होतीलालकृतात्मना।
गङ्गाऽवतरणं भगीरथतपस्यया कृतम्॥

# ✷ महाविद्यालय-समाचारः ✷

[२०१६-१७तमे वर्षे गुरुकुल-महाविद्यालयपरिसरे निर्मितानां प्राचीनभवनानां जीर्णोद्धार-नवनिर्माण-सौन्दर्यीकरणानाञ्च कार्याणि संस्थायां कृतानि यानि महाविद्यालयस्य विशिष्ट-भौतिकोपलब्धयः सन्ति। महासभया सर्वसम्मति-माध्यमेनान्तरंगसभायाः प्रस्ताव-३संख्यान्तर्गतं संस्थायां अद्यपर्यन्तं कृतकार्याणां विवरणं प्रस्तूयते। यद्यथा- सह-सम्पादकः]

१. सभायाः आदेशानुसारं भण्डारस्य अन्तिकं एकस्य ५०x२०परिमितस्य अतिरिक्त-भोजनकक्षस्य निर्माणं कृतम्। इत्यस्य निर्माणे षट्लक्षरुप्यकाणि संस्थया व्ययः कृतः।

२. २०१७तमस्य वर्षस्य अगस्तमासे आचार्य-नरदेवशास्त्रीमहोदयस्य कुटेः उभयपक्षे निर्मितयो आश्रमयोः पुनर्निर्माणं जीर्णोद्धार-कार्यञ्च च पूर्णतां गतम्। इत्यस्य पुनर्निर्माणे जीर्णोद्धारे च संस्थायैः १९लक्षरुप्यकाणां व्यय अभवत्।

३. २०१७तमस्य वर्षस्य अगस्तमासे एव संस्थायाः प्राचीनगोशालायाः एकस्मिन् बृहद्परिसरे भव्यतम गोष्ठनिर्माणं एस.डी.आई.एम.टी. इत्यस्य निदेशकैः श्रीराजेशगोयलमहाभागैः स्वपूज्यमातृमही-पितामहवर्याणां पावनस्मृतौ कारयन् संस्थायैः समर्पितम्। एतर्थं दानीमहानुभावानां निधि-पक्षतः पञ्चलक्षरुप्यकाणि व्ययो जातानि। संस्थापक्षपतः तेषां सर्वेषां धन्यवादः।

४. अगस्तमासे एव संस्थायाः प्रधानवर्यैः श्रीयोगेन्द्रसिंहचौहान(एडवोकेट/वाक्कीलैः)-महाभागैः गोशालायाः सम्पूर्णे प्राङ्गणे क्षेत्रे च इष्टिकाभरणं(पड़ञ्जा) द्विलक्षरुप्यकेण क्रियते तथा च स्वधर्मपत्नीश्रीमतीप्रभाचौहान-पुण्यस्मृतौ संस्थायां पूर्वनिर्मितस्य प्रधान-भवनस्य जीर्णोद्धारकार्यार्थं स्वपक्षतः पञ्च-लक्षरुप्यकाणि प्रदत्तानि। येन धनेन जीर्णोद्धार-कार्यं पूर्णतां अगच्छत्। महाविद्यालय-सभापक्षतः तेषां महद्धन्यवादः।

५. महाविद्यालयस्य दक्षिणभागेऽस्थितस्य द्वारस्यान्तिके द्वादशसंख्यात्मकस्य स्वामि-दर्शनानन्द-आपणस्य(मार्केट) निर्माणं कृतम्, यस्य निर्माणे षड्विंशलक्षरुप्यकाणां व्ययो जातः। ततः धनार्जनेन संस्थाया उन्नतिः भविष्यति।

६. संस्थायाः माध्यमेन पूर्वदिशायां पञ्च-संख्यात्मकस्य इतोऽप्यन्यस्य आपणस्य निर्माणकार्यं प्रारभः।

७. बी.एच.ई.एल.हरिद्वारेण कार्पोरेट-सामाजिक-दायित्त्वान्तर्गते प्रसाधनभवनस्य निर्माणं (शौचालयप्रसाधन-नवनिर्माण-परियोजना २०१६-१७) श्री एस.के. अग्रवालमहोदयैः महाप्रबन्धकैः (मानव-संसाधन) तथा च ग्रामीक्षेत्रहरिद्वारस्य विधायकवर्याणां मन्त्रीसभा-स्वामीयतीश्वरानन्दमहाराजवर्याणां प्रेरणया कृतम्। इत्यर्थं ४लक्षरुप्यकाणां व्ययो जातः।

एवं विद्यालस्य संस्थायाश्च दिनानुदिनसंवर्धनाय संस्थायाः सभायाश्च अधिकारिवर्गाणां कृते धन्यवादः। ●

# ✷ दृष्टस्त्वया प्रभावो मे ✷

डॉ. प्रशस्यमित्रशास्त्री
(साहित्याकादमी-राष्ट्रपति-सम्मानितः)
बी. २९, आनन्दनगरम् (जेलरोड) रायबरेली (उ.प्र.)

(१)
द्विवादने तु गच्छन्तं निशि चैकाकिनं यदा।
विलोक्य देवदत्तं तम् आरक्षी पुरुषः क्वचित्॥

(२)
पप्रच्छ तं कठोरेण यत् ते नाम किमस्ति भो!।
एतावत्यां निशायां च कुत्र ते गमनं तथा?॥

(३)
प्रश्नं आरक्षिणः श्रुत्वा देवदत्तः ससम्भ्रमः।
किञ्चित् तत्र भयाऽऽक्रान्तः सादरं प्रत्युवाच यत्॥

(४)
नाम्नाऽहं कालिदासोऽस्मि संस्कृतस्य कविस्तथा।
साम्प्रतं पठनार्थं च गच्छामि पुस्तकालये॥

(५)
तच्छ्रुत्वा रोषमापन्नो देवदत्तं विभीषयन्।
गम्भीरेण स्वरेणैव आरक्षी निजगाद यत्॥

(६)
भद्रमिच्छसि चेत् सत्यं ब्रूहि मे पुरतोऽधुना।
किं च ते नामधेयं स्यात् करोषि किं च साम्प्रतम्?॥

(७)
तस्य तद्वचनं श्रुत्वा देवदत्तः शनैः शनैः।
भयाक्रान्तेन भावेन तम् आरक्षिणम् आह यत्॥

हरिद्वार-स्थितस्य ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्
भारतोदयः (संस्कृत-मासिकम्)
P.O. गुरुकुलकांगड़ी २४९४०४
हरिद्वार
सेवायाम्, श्री......

(८)
वस्तुतः प्रेमचन्दोऽहम् मुंशीति नाम-पूर्वकः।
अहमेव च 'गोदानम्' उपन्यासं लिलेख च॥

(९)
आकर्ण्य तस्य तद्वाक्यम् आरक्षी स्वसहायकम्।
विहस्य प्रोक्तवान् एवं तत्र यः समुपस्थितः॥

(१०)
दृष्टस्त्वया प्रभावो मे? विदितं पूर्वमेव यत्।
असत्यं पुरुषश्चाऽयं ब्रवीति निश्चितं परम्॥

(११)
एकेनैव हि वाक्येन भयस्योत्पादकेन मे।
तत्क्षणम् एव सत्यं स वक्तुं प्रारब्धवान् नरः॥

मुद्रकेण, प्रकाशकेन **डॉ. हरिगोपालशास्त्रिणा** ज्वालापुर-स्थिते **'न्यू जे.एन. स्टेशनरी मार्ट'** नामके मुद्रणालये मुद्रापयित्वा **'भारतोदयः'** मासिकं पत्रं प्राकाश्यं नीतं हरिद्वार-स्थितया ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभया।
**सम्पादकः डॉ. हरिगोपालशास्त्री**